चोपकः, [1]चोपनः, [2]चोपयन्-न्ती, चोपयिष्यन्-न्ती-ती, [A]चुपित्वा-चोपित्वा, इति रूपाण्यस्येति विशेषः ।

(544) "चुबि वक्त्रसंयोगे" (I-भ्वादिः-429. अक. सेट्. पर.)

'हिंसायाम्, वक्त्रसंयोगे चुम्बयेच्चुम्बति क्रमात् ।' (श्लो. 140) इति देवः । चुम्बकः-म्बिका, चुम्बकः-म्बिका, चुचुम्बिषकः-षिका, चोचुम्बकः-म्बिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककुण्ठतिवत् (209) बोध्यानि । [B]चुम्बितम्, [3]शिरश्चुम्बी[C] ।

(545) "चुबि हिंसायाम्" (X-चुरादिः-1636. सक. सेट्. उभ.)

'हिंसायाम्, वक्त्रसंयोगे चुम्बयेच्चुम्बति क्रमात् ।' (श्लो. 140) इति देवः । चुम्बकः-म्बिका, चुचुम्बयिषकः-षिका, [4]चुम्बकः-म्बिका, चुचुम्बिषकः-षिका, चोचुम्बकः-म्बिका; इत्यादीनि सर्वाण्यपि रूपाणि [विशेषरूपाणि विना] चौरादिकचिन्तयतिवत् (523) बोध्यानि । घञि-चुम्बकः[D] ।

(546) "चुर स्तेये" (X-चुरादिः-1534. सक. सेट्. उभ.)

'स्तेये चोरयतीति स्यात्, चुरेश्छेदे चुरेदिति ।' (श्लो. 151) इति देवः ।

---

1. 'चलनशब्दार्थादकर्मकाद्युच्' (3-2-148) इति ताच्छीलिको युच् ।
2. ण्यन्तात्, 'अणावकर्मकात्—' (1-3-88) इति परस्मैपदमेव ।
3. शिरः चुम्बितुं शीलमस्येति ताच्छील्ये णिनिः ।
4. इदित्करणात् णिचो वैकल्पिकत्वम् । णिजभावपक्षे शुद्धात् सन्नन्तात्-यङन्ताच्च क्रमेण रूपाण्यूह्यानि ।

A. 'श्येनाश्चुपित्वा तुतुपुः कपोतकान् काकानतुम्पन्नभितुत्रुपुः शशान् ॥'
धा. का. 1.52.

B. 'वियोगसंतुम्बितकोकचुम्बिता सन्तापसृब्धाऽपि जगाद तद्वधूः ।'
धा. का. 1.56.

C. 'नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे' । हर्षचरिते । 1. 1.

D. 'न रिफट्यामि किमु चुम्बभिया स्थितोऽसि किं पूलिताञ्चकृतपुंसनयाऽत्र पुंसाम् ॥'
धा. का. 3. 26.